स्फुटः। गवां खुरम्। इति विश्वमेदिन्यौ॥ गोखुरैः स्फुटीकृतः। इति हेमचन्द्रः॥ विकण्टकवृक्षः। इति राजनिर्घण्टः॥

गोकर्णः, पुं, (गोः कर्ण इव। तत्तुल्यपरिमाणवत्त्वादस्य तथात्वम्।) परिमाणविशेषः। स तु अनामिकायुक्तविस्तृताङ्गुष्ठम्। (गोः कर्णाविव कर्णौ यस्य।) मृगभेदः। इत्यमरः। २।५।१०॥ (यथा च अनर्घराघवे। २। २३।

"मुनिविनियोगविलूनप्ररूढमृदुशाद्वलानि
बर्हींषि।
गोकर्णतर्णकोऽयं तर्णोत्सुकण्टकच्छेषु॥"

अस्य मांसगुणा यथा,—

"गोकर्णमांसं मधुरं स्निग्धं मृदु कफापहम्।
विपाके मधुरञ्चापि रक्तपित्तविनाशनम्॥"
इति सुश्रुते सूत्रस्थाने ६४ अध्यायः॥)

अश्वतरः। (गौरस्येव कर्णौ यस्य।) सर्पभेदः। (गोरिव कर्णौ यस्य।) गणदेवताविशेषः। इति मेदिनी। णे। ४६॥ तीर्थविशेषः। यथा, भागवते।

"ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्त्तकान्।
गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः॥"

(पीठस्थानम्। यथा, देवीभागवते।७।३०।६०।

"केदारपीठे सम्प्रोक्ता देवीसन्मार्गदायिनी।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका॥")

गोकर्णी, स्त्री, (गोः कर्ण इव पत्रमस्याः। "पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च।" ४।१।६४। इति ङीष्।) मूर्व्वालता। इत्यमरः। २।४।८४॥ (विवृतिरस्या मूर्व्वाशब्दे ज्ञातव्या॥)

गोकिराटिका, स्त्री, (गां वाचं किरति रटतीत्यर्थः। कॄ+"इगुपधज्ञाप्रीकिरः कः।" ३।१।१३५। इति कः। ततष्टाप् गोकिरा। तथा सती अटतीति। अट्+ण्वुल्। ततष्टाप् अत इत्वञ्च।) सारिकापक्षी। इति हेमचन्द्रः॥

गोकिराटी, स्त्री, (गोकिरा वाचं रटन्ती सती अटतीति। अट गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्। गौरादित्वात् ङीष्।) सारिकापक्षी। इति राजनिर्घण्टः॥

गोकिलः, पुं, (गोः पृथिव्याः कील इव। निपातनात् ह्रस्वः।) मुषलम्। हलम्। इति हेमचन्द्रः॥

गोकीलः, पुं, (गोः पृथिव्याः कील इव।) मुषलम्। हलम्। इति हारावली॥ २५५॥

गोकुलं, क्ली, (गोः कुलम्।) गोसमूहः। तत्पर्य्यायः। गोधनम् २ गवांव्रजः ३। इत्यमरः। २।६।५८॥ (यथा, रामायणे। २।६।१७।

"गोकुलाकुलतीरायाः तमसाया विदूरतः।
अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह॥")

गोस्थानम्। यथा, तिथ्यादितत्त्वे।

"गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च॥"

मथुरैकदेशे श्रीनन्दस्य वासस्थानम्। यथा,—

"कालेन व्रजता तात! गोकुले रामकेशवौ।
जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः॥"
इति श्रीभागवतम्॥

(अत्र प्रदेशे महादेवो गोपीश्वर इत्याख्यया प्रसिद्धो विराजति। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे,—

"गोकुले गोपिनीपूज्यो गोपीश्वर इतीरितः॥")

पुं, स्वनामख्यातः पण्डितविशेषः। अयन्तु सप्तदशशतपरिमितशकाब्दसम्वत्सरप्रारम्भे एव मिथिलादेशान्तर्वर्त्तिनि 'मगरौणी' संज्ञकग्रामे विद्यानिधिपीताम्बरपण्डितात् जातः इति मैथिलाः। अद्यावधि ज्ञाता अनेन विरचिता ग्रन्थास्त्विमे। १ दीधितिविद्योतः (शिरोमणिटीका।) २ न्यायसिद्धान्ततत्त्वम्। ३ पदवाक्यरत्नाकरः। ४ मासमीमांसा। ५ मिथ्यात्वनिरुक्तिः। ६ रश्मिचक्रम् (चिन्तामणिटीका। ७ रसमहार्णवः। ८ लाघवगौरवरहस्यम्। ९ शिवशतकम्॥)

गोकुलिकः, त्रि, (गोर्नेत्रस्य कुलं चञ्चलभावः प्रखरदृष्टिचातुर्य्यमित्यर्थः। तदस्यास्तीति। "अत इनिठनौ।" ५।२।११६। इति ठन्।) केकरः। (पङ्कपतिते गवि कुलिकः उपेक्षकत्वात् जड इव।) पङ्कस्थगव्युपेक्षकः। इति मेदिनी। के। १८६॥

गोकृतं, क्ली, (गोभिः कृतम् उच्चरितम्। कृ+भावे क्तः। कृदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् गोपुरीषमित्यर्थः।) गोमयम्। इति शब्दचन्द्रिका॥

गोक्षुरः, पुं, (क्षुरति विलिखतीति। क्षुर विलेखने+"इगुपधज्ञेति।" ३।१।१३५। इति कः। ततो गोः पृथिव्याः क्षुरः अस्त्रविशेष इव। बहुकण्टकाकीर्णत्वात् तथात्वम्।) क्षुद्रक्षुपविशेषः। स तु क्षुद्रबृहद्भेदेन द्विविधः। गोखुरि इति गोखुरु इति च भाषा॥ तत्पर्य्यायः। त्रिकण्टः २ स्थलशृङ्गाटः ३ गोकण्टः ४ त्रिकण्टकः ५ त्रिपुटः ६ कण्टकफलः ७ क्षुरः ८। इति रत्नमाला॥ गोक्षुरकः ९ पलङ्कषा १० इक्षुगन्धा ११ श्वदंष्ट्रा १२ स्वादुकण्टकः १३ गोकण्टकः १४ वनशृङ्गाटः १५। इत्यमरः। २।४।९८—९९॥ क्षुरकः १६ भक्षकण्टः १७ इक्षुगन्धिका १८। इति भावप्रकाशः॥ क्षुरङ्गः १९ श्वदंष्ट्रकः २० कण्टकी २१ भद्रकण्टः २२ व्यालदंष्ट्रः २३ षड्ङ्गः २४ गोखुरः २५ त्रिकटः २६ त्रिकः २७ इक्षुरः २८। इति शब्दरत्नावली॥ अस्य गुणाः। सुशीतलत्वम्। बलप्रदत्वम्। मधुरत्वम्। बृंहणत्वम्। कृच्छ्राश्मरीमेहविदाहनाशित्वम्। रसायनत्वम्। तत्र बृहतो गुणोत्तरत्वञ्च। इति राजनिर्घण्टः॥ स्वादुत्वम्। वस्तिशोधनत्वम्। दीपनत्वम्। पुष्टिदत्वम्। श्वासकासार्शोव्रणनाशित्वञ्च। इति भावप्रकाशः॥ वायुनाशित्वम्। वृष्यत्वञ्च॥ तच्छाकगुणाः। तिक्तत्वम्। वृष्यत्वम्। स्रोतोविशोधनत्वञ्च। इति राजवल्लभः॥

गोक्षुरकः, पुं, (गोक्षुर+स्वार्थे कन्।) गोक्षुरः। इत्यमरः। २।४।९८॥ (अस्य पर्य्याया यथा,—

"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः।
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि।
पलङ्कषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

यथा, च सुश्रुते चिकित्सितस्थाने षड्विंशेऽध्याये॥

"शृङ्गाफलं गोक्षुरकाच्च बीजं
तयोश्चूर्णं गोपयसा विपाच्य।
घनाहृतं शर्करया च युक्तं
पीत्वा नरो हृष्यति सर्व्वरात्रम्॥")

गोखुरः, पुं, (खुरति विलिखतीति। खुरः अस्त्रविशेषः। गोः पृथिव्याः खुर इव।) गोक्षुरवृक्षः। इति शब्दरत्नावली॥ (गवां खुरम्।) गवां शफे क्ली॥

गोखुरिः, पुं, (गवां खुरिरिव।) गोक्षुरः। इति शब्दचन्द्रिका॥

गोगृष्टिः, स्त्री, (गौर्गृष्टिः गौरेव गृष्टिरित्यर्थः। जात्या समासे परनिपातः।) सकृत्प्रसूता गौः। इति केचित्॥

गोगोयुगं, क्ली, (गोद्वित्वम्। गो+द्वित्वे गोयुगच्।) गोद्वयम्। ("पशुभ्यः स्थानद्विषट्के गोष्ठगोयुगषड्गवम्।" इति मुग्धबोधसूत्रम्॥)

गोगोष्ठं, क्ली, (गोः स्थानम्। गो+स्थाने गोष्ठच्।) गोस्थानम्। इति मुग्धबोधव्याकरणम्॥

गोग्रन्थिः, पुं, (गोनिःसृतो ग्रन्थिरिव।) करीषः। (गोर्ग्रन्थिर्बाहुल्यात् एकत्र ग्रन्थनं यत्र।) गोष्ठम्। (गोर्ग्रन्थिरिव।) गोजिह्विकौषधिः। इति मेदिनी। थे। १९॥

गोघ्नः, पुं, (गौर्हन्यतेऽस्मै। गो+हन्+सम्प्रदाने मूलविभूजादित्वात् कः।) अतिथिः। इति पाणिनिः॥ (गां हन्ति। हन्+कः।) गोघातके त्रि। यथा, प्रायश्चित्ततत्त्वे।

"गोघ्नवद्विहितः कृच्छ्रश्चान्द्रायणमथापि वा॥"

गोघृतं, क्ली, (गोः पृथिव्या घृतमिव शस्यादिपोषकत्वात्।) वृष्टिः। इति त्रिकाण्डशेषः॥ (गोर्जातं घृतम्।) गव्यघृतञ्च॥

गोचरः, पुं, (गाव इन्द्रियाणि चरन्त्यस्मिन्। गो+चर+"गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च।" ३।३।११९। इति निपातनात् साधुः।) इन्द्रियार्थः। स तु रूपशब्दगन्धरसस्पर्शस्वरूपः। इत्यमरः। १।५।८॥ (यथा भाषापरिच्छेदे "घ्राणस्य गोचरो गन्धः॥"*॥ गावश्चरन्त्यस्मिन्निति। गोचरणस्थानम्। इति सिद्धान्तकौमुदी। यथा च भारविः। ४।१०।

"उपारताः पश्चिमरात्रिगोचरा-
दपारयन्तः पतितुं जवेन गाम्॥"

गोषु इन्द्रियेषु चरतीति। गो+चर्+पचाद्यच्। इन्द्रियप्रत्यक्षीभूतविषयः। यथा, वेदान्तसारे।

"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्॥"

४५ II.47